**CBSE Class 12 संस्कृत कोर**
**एनसीईआरटी प्रश्न-उत्तर**
**पाठ - 3 राष्ट्रचिन्ता गरीयसी**

---

**अनुप्रयोगः**

**1. निम्नशब्दानाम् उच्चारणं अभिनयपूर्वकं उच्चैः कुरुत -**
परिक्रम्य, आकाशम् उद्वीक्ष्य, आरुह्य, उपविश्य, प्रणम्य, प्रविश्य, आसनाद्, उत्थानम्।

**उत्तरम्-**

- **परिक्रम्य** = मञ्च पर चारों ओर घूमकर परिक्रमा का अभिनय कीजिए।
- **आकाशम् उद्वीक्ष्य** = आकाश की ओर ऊपर देखने का अभिनय कीजिए, मानों ऊपर से कोई आवाज सुनने का प्रयत्न कर रहे हों।
- **आरुह्य** = मञ्च पर ऊपर चढ़ने का अभिनय करें।
- **उपविश्य** = बैठने का अभिनय करें।
- **प्रणम्य** = चरणों में प्रणाम, निवेदन करने (झुकने) का अभिनय करें।
- **प्रविश्य** = प्रवेश करने (रंगमंच पर आने) का अभिनय करें।
- **आसनाद उत्थाय** = आसन से उठने का अभिनय करें।

---

**2. अत्र अनेके भावाः मञ्जूषायां सन्ति। निम्नपङ्क्तिभिः सह उचितं भावं मेलयत, अभिनयपूर्वकं च पठत-**

**मञ्जूषा**

| |
|---|
| आश्चर्यम्, आशीर्वादः, आदेशः, क्रोधः, चिन्ता, प्रार्थना, उपदेशः, जिज्ञासा, परामर्शः, उत्सुकता |

| पङ्क्तयः | भावाः |
|---|---|
| **यथा- (i) भद्राः! त्वरध्वम्, त्वरध्वम्** | **आदेशः** |
| (ii) इतः इतः देवः! | .............. |
| (iii) कथमधुना अपि कौमुदीमहोत्सवः न प्रारब्धः? | .............. |
| (iv) आर्य! आर्यचाणक्यं द्रष्टुमिच्छामि। | .............. |
| (v) अहो राजाधिराजमंत्रिणः विभूतिः! | .............. |
| (vi) उत्तिष्ठ, उत्तिष्ठ वत्स! विजयताम्। | .............. |
| | |

| | |
|---|---|
| (vii) दुर्गसंस्कारः प्रारब्धव्यः। | ............. |

**उत्तरम्-**

| पङ्क्तयः | भावाः |
|---|---|
| (i) भद्राः! त्वरध्वम्, त्वरध्वम् | आदेशः |
| (ii) इतः इतः देवः! | प्रार्थना |
| (iii) कथमधुना अपि कौमुदीमहोत्सवः न प्रारब्धः? | क्रोधः |
| (iv) आर्य! आर्यचाणक्यं द्रष्टुमिच्छामि। | उत्सुकता |
| (v) अहो राजाधिराजमंत्रिणः विभूतिः! | आश्चर्यम् |
| (vi) उत्तिष्ठ, उत्तिष्ठ वत्स! विजयताम्। | आशीर्वादः |
| (vii) दुर्गसंस्कारः प्रारब्धव्यः। | परामर्शः |

**3. अधोलिखितप्रातिपदिकानां प्रथमाविभक्तौ एकवचने सम्बोधने च एकवचने रूप लिखत-**

| प्रातिपदिकम् | प्रथमा-एकवचने | सम्बोधन-एकवचने |
|---|---|---|
| (i) आर्य | .................... | .................... |
| (ii) भद्र | .................... | .................... |
| (iii) देव | .................... | .................... |
| (iv) वत्स | .................... | .................... |
| (v) वृषल | .................... | .................... |
| (vi) वैहीनरि | .................... | .................... |

**उत्तरम्-**

| प्रातिपदिकम् | प्रथमा-एकवचने | सम्बोधन-एकवचने |
|---|---|---|
| (i) आर्य | आर्यः | आर्य ! |
| (ii) भद्र | भद्रः | भद्र ! |
| (iii) देव | देवः | देव ! |

| | | |
|---|---|---|
| (iv) वत्स | वत्सः | वत्स ! |
| (v) वृषल | वृषल: | वृषल ! |
| (vi) वैहीनरि | वैहीनरिः | वैहिनरे ! |

**4. निम्नपदेषु प्रकृतिप्रत्ययविभागं संयोग च कुरु-**

| | | |
|---|---|---|
| (क) श्रोतुम् | = | ................ + तुमुन् |
| (ख) अभि + युज् + णिच् + तुमुन् | = | ................ |
| (ग) अव + लोक + तुमुन् | = | ................ |
| (घ) द्रष्टुम् | = | ................ |
| (ङ) वि + ज्ञा + णिच् + तुमुन् | = | ................ |
| (च) अनु + ................... + तुमुन् | = | अनुग्रहीतुम् |
| (छ) उप + आ + ................ + तुमुन् | = | उपालब्धुम् |

**उत्तरम्-**

| | | |
|---|---|---|
| (क) श्रोतुम् | = | श्रु + तुमुन् |
| (ख) अभि + युज् + णिच् + तुमुन् | = | अभियोजयितुम् |
| (ग) अव + लोक + तुमुन् | = | अवलोकयितुम् |
| (घ) द्रष्टुम् | = | दृश् + तुमुन् |
| (ङ) वि + ज्ञा + णिच् + तुमुन् | = | विज्ञापयितुम् |
| (च) अनु + ग्रह् + तुमुन् | = | अनुग्रहीतुम् |
| (छ) उप + आ + लभ् + तुमुन् | = | उपालब्धुम् |

**5. अधोलिखितेषु वाक्येषु क्तान्तविशेषणानि योजयत-**

1. **समिद्भिः .................... छदिप्रान्तः।**
2. **.................... भित्तयः।**
3. **भवद्भिः एव प्रोत्साह्य .................... वृषलः।**
4. **वृषल! स्वयम .................... राज्ञाम् एते दोषाः सम्भवन्ति।**

5. **सुगाङ्गप्रासादस्य उपरि .................... प्रदेशाः संस्क्रियन्ताम्।**
6. **अयम् .................... एव देवः चन्द्रगुप्तः।**
7. **ततः प्रविशति आसनस्थः .................... चिन्तां नाटयन् चाणक्यः।**
8. **म्लेच्छबलेन .................... पर्वतकपुत्रः मलयकेतुः अस्मान् अभियोक्तुम् उद्यमः।**

**उत्तरम्-**

1. समिद्भिः <u>अतिनिमितः</u> छदिप्रान्तः।
2. <u>जीर्णाः</u> भित्तयः।
3. भवद्भिः एव प्रोत्साह्य <u>कोपितः</u> वृषलः।
4. वृषल! स्वयम् <u>अनभियुक्तानाम्</u> राज्ञाम् एते दोषाः सम्भवन्ति।
5. सुगाङ्गप्रासादस्य उपरि <u>स्थिताः</u> प्रदेशाः संस्क्रियन्ताम्।
6. अयम् <u>आगतः</u> एव देवः चन्द्रगुप्तः।
7. ततः प्रविशति आसनस्थः <u>स्वभवनगतः</u> चिन्तां नाटयन् चाणक्यः।
8. म्लेच्छबलेन <u>परिवृतः</u> पर्वतकपुत्रः मलयकेतुः अस्मान् अभियोक्तुम् उद्यमः।

---

**6. अधोलिखितवाक्यानाम् हेतु वाच्यपरिवर्तनसम्बन्धित वाक्यानि पाठात् दृष्ट्वा लिखत-**

1. **प्रभवः निष्प्रयोजनम् अधिकारिणः न आह्वयन्ति।**
2. **(भवान्) अस्मान् उपालब्धुम् आहूतवान्।**
3. **शिष्यः गुरोः आज्ञां पालयेत्।**
4. **अतः पृच्छामि।**
5. **अतएव श्रोतुम् इष्यते।**
6. **निस्पृहत्यागिनः राजानं तृणम् इव मन्यन्ते।**
7. **स्वयमेव देवः अवलोकितवान्।**
8. **भवन्तः एव प्रोत्साह्य वृषलं कोपितवन्तः।**
9. **सुगाङ्गप्रासादस्य उपरि स्थितान् प्रदेशान् संस्कुर्वन्तु।**
10. **पुष्पमालाभिः स्तम्भाः अलङ्क्रियन्ताम्।**

**उत्तरम्-**

1. प्रभुभिः निष्प्रयोजनम् अधिकारिभिः न आहूयन्ते।
2. (भवता) वयम् उपालब्धुम् आहूताः।
3. शिष्येण गुरोः आज्ञा पालनीया।
4. अतः पृच्छयते।

5. अतएव श्रोतुमिच्छामि।
6. निस्पृहत्यागिभिः राजा तृणम्ः इव मन्यते।
7. स्वयमेव देवेन अवलोकितम्।
8. भवद्भिः एव प्रोत्साहय वृषलः कोपितः।
9. सुगाङ्गप्रासादस्य उपरि स्थिताः प्रदेशाः संस्क्रियन्ताम्।
10. पुष्पमालाभिः स्तम्भान् अलङ्कुर्वन्तु।

---

**7. पाठात् तां पंक्ति चित्वा लिखत यया ज्ञायते-**

1. **चाणक्यः आचार्यः आसीत्।**
2. **चाणक्यः स्वाभिमानी आसीत्। सः कस्मादपि न बिभेति स्म।**
3. **चन्द्रगुप्तः धर्मवृत्तिपरकः आसीत्।**
4. **राक्षसः नाम नन्दस्य मन्त्री चाणक्येन सह स्पर्धा कर्तुम् इच्छति स्म।**
5. **चाणक्यस्य गृह जीर्णकुटीरम् इव आसीत्।**
6. **कञ्चुकी चाणक्यात् बिभेति स्म।**
7. **चाणक्यः प्रजायाः धनस्य अपव्ययं सोढुं न समर्थः।**
8. **चन्द्रगुप्तः चाणक्यस्य राज्यकार्येषु हस्तक्षेपेण राज्यं बन्धनम् इव मन्यते स्म।**

**उत्तरम्-**

1. आर्य! आचार्यचाणक्यं द्रष्टुम् इच्छामि।
2. उपालब्धुं तर्हि वयम् आहूताः। प्रथमं ममापि तव आज्ञायाः उल्लंघनम् एव।
3. आर्य वैहीनरे! आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्नं दापय। अहो, राज्यं हि नाम धर्मवृत्तिपरकस्य नृपस्य कृते महत् कष्टदायकम्।
4. कथं स्पर्धते मया सह दुरात्मा राक्षस:?
5. अत्र शुष्यमाणैः समिद्भिः अतिनमितः छदिप्रान्तः जीर्णाः भित्तयः।
6. आर्य, देवेन एव अहम् आर्यस्य चरणयोः प्रेषितः।
7. किम् अस्थाने महान् प्रजाधनापव्ययः?
8. आर्येण एव सर्वत्र निरुद्धचेष्टस्य मे बन्धम् इव राज्यम्, न राज्यम् इव।

---

**8. अधोलिखितानि कथनानि क: क प्रति कथयति-**

| पङ्क्तय: | कः | कम् |
|---|---|---|
| (क) किम् अस्थाने महान् प्रजाधनापव्ययः। | .................. | .................. |
| | | |

| | | |
|---|---|---|
| (ख) शान्तं पाप शान्तं पापम्। | ……………… | ……………… |
| (ग) नहि नहि विज्ञापयितुम्। | ……………… | ……………… |
| (घ) चन्दनवारिणा भूमिं सिञ्चन्तु। | ……………… | ……………… |
| (ङ) आर्य! इदम्। अनुष्ठीयते देवस्य शासनम् इति। | ……………… | ……………… |
| (च) इत इतो देवः। | ……………… | ……………… |

**उत्तरम्-**

| पङ्क्तयः | कः | कम् |
|---|---|---|
| (क) किम् अस्थाने महान् प्रजाधनापव्ययः। | चाणक्यः | राजानम् वृषलम् |
| (ख) शान्तं पापं शान्तं पापम्। | राजा | चाणक्यम् |
| (ग) नहि नहि विज्ञापयितुम्। | राजा | चाणक्यम् |
| (घ) चन्दनवारिणा भूमिं सिञ्चन्तु। | कञ्चुकी | प्रासादाधिकृतान् पुरुषान् |
| (ङ) आर्य! इदम्। अनुष्ठीयते देवस्य अनुशासनम्। | प्रासादाधिकृताः पुरुषाः | कञ्चुकीम् |
| (च) इत इतों देवः। | कञ्चुकी | राजानम् |

**9. अत्र चाणक्यगृहस्य वर्णनं अस्ति। अस्मिन् वर्णने एकं वाक्यं अशुद्धम् अस्ति, तत् चिह्नीकुरुत-**

1. **गृहस्य भित्तयः जीर्णाः आसन्। ( ……………………… )**
2. **एकस्मिन् कोणे गोमयस्य उपलानां भेदनार्थं प्रस्तरखण्डम् आसीत्। ( ……………………… )**
3. **छात्रैः आनीतानां दर्भाणां संहतिः आसीत्। ( ……………………… )**
4. **गृहस्य छदिप्रान्तः अतिनिमितः आसीत्। ( ……………………… )**
5. **राजाधिराजमन्त्रिकृते यथोचिताः विभूतयः आसन्। ( ……………………… )**

**उत्तरम्-**

1. शुद्धम्
2. शुद्धम्
3. शुद्धम्
4. शुद्धम्
5. अशुद्धम्।

**10.** निम्नप्रश्नानाम् उत्तराणि समुचितशब्तदे लिखत -

1. **कौमुदीमहोत्सवः कस्य आज्ञया आघोषितः आसीत्? ..........................**
2. **कः चन्द्रगुप्तस्य राज्यम् आक्रान्तुम् उद्यतः भवति? ..........................**
3. **मलयकेतुः किमर्थं क्रुद्धः आसीत्? ..........................**
4. **कस्य संस्कारः अपेक्षित आसीत्? ..........................**
5. **चाणक्यः कं 'वृषल' इति सम्बोधयति? ..........................**
6. **वैहीनरिः कस्य नाम आसीत्? ..........................**
7. **चाणक्यस्य मतानुसारं कस्य चिन्ता गरीयसी? ..........................**

उत्तरम्-

1. कौमुदीमहोत्सवः **चन्द्रगुप्तस्य** आज्ञया आघोषितः आसीत्।
2. **मलयकेतुः** चन्द्रगुप्तस्य राज्यम् आक्रान्तुम् उद्यतः भवति।
3. मलयकेतुः **पितृवधात्** क्रुद्धः आसीत्।
4. **सुगाङ्गप्रासादस्य उपरि स्थितस्य प्रदेशस्य** संस्कारः अपेक्षित आसीत्।
5. चाणक्यः **चन्द्रगुप्तं** 'वृषल' इति सम्बोधयति।
6. वैहीनरिः **कञ्चुकिनः** नाम आसीत्।
7. चाणक्यस्य मतानुसार **राष्ट्रस्य** चिन्ता गरीयसी।